Shri Kamakalakali Sahasranamavali 1000 Names

# श्रीकामकलाकालीसहस्रनामावलिः

## Document Information

Text title : kAmakalAkAlIsahasranAmAvaliH 1000 names

File name : kAmakalAkAlIsahasranAmAvaliH.itx

Category : sahasranAmAvalI, devii, dashamahAvidyA, devI, nAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : See corresponding stotra

Source : mahAkAlasaMhitA kAmakalA khaNDa dvAdashapaTala

Latest update : July 12, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 26, 2023

*sanskritdocuments.org*

# श्रीकामकलाकालीसहस्रनामावलिः

ॐ अस्य कामकलाकालीसहस्रनामस्तोत्रस्य श्रीत्रिपुरघ्नऋषिः ।
अनुष्टुप् छन्दः । त्रिजगन्मयरूपिणी भगवती श्रीकामकलाकाली देवता ।
क्लीं बीजम् । स्फ्रों शक्तिः । हुं कीलकं । क्ष्रौं तत्त्वं ।
श्रीकामकलाकालीसहस्रनामस्तोत्रपाठे जपे विनियोगः । ॐ तत्सत् ॥

ॐ क्लीं कामकलाकाल्यै नमः । कालरात्र्यै । कपालिन्यै । कात्यायन्यै ।
कल्याण्यै । कालाकारायै । करालिन्यै । उग्रमूर्त्यै । महाभीमायै ।
घोररावायै । भयङ्करायै । भूतिदायै । भयहन्त्र्यै ।
भवबन्धविमोचन्यै । भव्यायै । भवान्यै । भोगाढ्यायै ।
भुजङ्गपतिभूषणायै । महामायायै । जगद्धात्र्यै नमः । २०

ॐ पावन्यै नमः । परमेश्वर्यै । योगमात्रे योगगम्यायै । योगिन्यै ।
योगिपूजितायै । गौर्यै । दुर्गायै । कालिकायै । महाकल्पान्तनर्तक्यै ।
अव्ययायै । जगदाद्यै । विधात्र्यै । कालमर्द्दिन्यै । नित्यायै ।
वरेण्यायै । विमलायै । देवाराध्यायै । अमितप्रभायै ।
भारुण्डायै नमः । ४०

ॐ कोटर्यै नमः । शुद्धायै । चञ्चलायै । चारुहासिन्यै । अग्राह्यायै ।
अतीन्द्रियायै । अगोत्रायै । चर्चरायै । ऊर्द्धशिरोरुहायै ।
कामुक्यै । कमनीयायै । श्रीकण्ठमहिष्यै । शिवायै । मनोहरायै ।
माननीयायै । मतिदायै । मणिभूषणायै । श्मशाननिलयायै । रौद्रायै ।
मुक्तकेश्यै नमः । ६०

ॐ अट्टहासिन्यै नमः । चामुण्डायै । चण्डिकायै । चण्ड्यै । चार्वङ्ग्यै ।
चरितोज्ज्वलायै । घोराननायै । धूम्रशिखायै । कम्पनायै ।
कम्पिताननायै । वेपमानतनवे भिदायै । निर्भयायै । बाहुशालिन्यै ।
उल्मुकाक्ष्यै । सर्पकर्ण्यै । विशोकायै । गिरिनन्दिन्यै । ज्योत्स्नामुख्यै ।
हास्यपरायै नमः । ८०

ॐ लिङ्गायै नमः । लिङ्गधरायै । सत्यै । अविकारायै । महाचित्रायै ।
चन्द्रवक्रायै । मनोजवायै । अदर्शनायै । पापहरायै । श्यामलायै ।
मुण्डमेखलायै । मुण्डावतंसिन्यै । नीलायै । प्रपन्नानन्ददायिन्यै ।
लघुस्तन्यै । लम्बकुचायै । घूर्णमानायै । हराङ्गनायै ।
विश्वावासायै । शान्तिकर्यै नमः । १००

ॐ दीर्घकेश्यै नमः । अरिखण्डिन्यै । रुचिरायै । सुन्दर्यै ।
कम्रायै । मदोन्मत्तायै । मदोत्कटायै । अयोमुख्यै । वह्निमुख्यै ।
क्रोधनायै । अभयदायै । ईश्वर्यै । कुडम्बिकायै । साहसिन्यै ।
खड्गक्यै । रक्तलेहिन्यै । विदारिण्यै । पानरतायै । रुद्राण्यै ।
मुण्डमालिन्यै नमः । १२०

ॐ अनादिनिधनायै नमः । देव्यै । दुर्निरीक्ष्यायै ।
दिगम्बरायै । विद्युज्जिह्वायै । महादंष्ट्रायै । वज्रतीक्ष्णायै ।
महास्वनायै । उदयार्कसमानाक्ष्यै । विन्ध्यशैल्यै । समाकृत्यै ।
नीलोत्पलदलश्यामायै । नागेन्द्राष्टकभूषणायै । अग्निज्वालकृतावासायै ।
फेत्कारिण्यै । अहिकुण्डलायै । पापघ्न्यै । पालिन्यै । पद्मायै ।
पूण्यायै नमः । १४०

ॐ पुण्यप्रदायै नमः । परायै । कल्पान्ताम्भोदनिर्घोषायै ।
सहस्रार्कसमप्रभायै । सहस्रप्रेतराक्रोधायै ।
सहस्रेशपराक्रमायै । सहस्रधनदैश्वर्यायै ।
सहस्राङ्घ्रिकराम्बिकायै । सहस्रकालदुष्प्रेक्ष्यायै ।
सहस्रेन्द्रियसञ्चयायै । सहस्रभूमिसदनायै । सहस्राकाशविग्रहायै ।
सहस्रचन्द्रप्रतिमायै । सहस्रग्रहचारिण्यै । सहस्ररुद्रतेजस्कायै ।
सहस्रब्रह्मसृष्टिकृते सहस्रवायुवेगायै । सहस्रफणकुण्डलायै ।
सहस्रयन्त्रमथिन्यै । सहस्रोदधिसुस्थिरायै नमः । १६०

ॐ सहस्रबुद्धकरुणायै नमः । महाभागायै । तपस्विन्यै ।
त्रैलोक्यमोहिन्यै । सर्वभूतदेववशङ्कर्यै । सुस्निग्धहृदयायै ।
घण्टाकर्णायै । व्योमचारिण्यै । शङ्खिन्यै । चित्रिण्यै । ईशान्यै ।
कालसङ्कर्षिण्यै । जयायै । अपराजितायै । विजयायै । कमलायै ।
कमलाप्रदायै । जनयित्र्यै । जगद्योनिहेतुरूपायै । चिदात्मिकायै नमः । १८०

ॐ अप्रमेयायै नमः । दुराधर्षायै । ध्येयायै । स्वच्छन्दचारिण्यै ।

शातोदर्यै । शाम्भविन्यै । पूज्यायै । मानोन्नतायै । अमलायै ।
ओङ्काररूपिण्यै । ताम्रायै । बालार्कसमतारकायै । चलज्जिह्वायै ।
भीमाक्ष्यै । महाभैरवनादिन्यै । सात्त्विक्यै । राजस्यै । तामस्यै ।
घर्घरायै । अचलायै नमः । २००

ॐ माहेश्वर्यै नमः । ब्राह्म्यै । कौमार्यै । ईश्वरायै । सौपर्ण्यै ।
वायव्यै । इन्द्र्यै । सावित्र्यै । नैर्ऋत्यै । कलायै । वारुण्यै ।
शिवदूत्यै । सौर्यै । सौम्यायै । प्रभावत्यै । वाराह्यै । नारसिंह्यै ।
वैष्णव्यै । ललितायै । स्वरायै नमः । २२०

ॐ मैत्र्यार्यम्ण्यै नमः । पौष्ण्यै । त्वाष्ट्र्यै । वासव्यै । उमारत्यै ।
राक्षस्यै । पावन्यै । रौद्र्यै । दास्र्यै । रोदस्यै । उदुम्बर्यै ।
सुभगायै । दुर्भगायै । दीनायै । चञ्चुरीकायै । यशस्विन्यै ।
महानन्दायै । भगानन्दायै । पिच्छिलायै । भगमालिन्यै नमः । २४०

ॐ अरुणायै नमः । रेवत्यै । रक्तायै । शकुन्यै । श्येनतुण्डिकायै ।
सुरभ्यै । नन्दिन्यै । भद्रायै । बलायै । अतिबलायै । अमलायै ।
उलुप्यै । लम्बिकायै । खेटायै । लिलेहानायै । अन्त्रमालिन्यै । वैनायिक्यै ।
वेताल्यै । त्रिजटायै । भ्रुकुट्यै नमः । २६०

ॐ मत्यै नमः । कुमार्यै । युवत्यै । प्रौढायै । विदग्धायै ।
घस्मरायै । जरत्यै । रोचनायै । भीमायै । दोलमालायै ।
पिचिण्डिलायै । अलम्बाक्ष्यै । कुम्भकर्ण्यै । कालकर्ण्यै । महासुर्यै ।
घण्टारवायै । गोकर्ण्यै । काकजङ्घायै । मूषिकायै ।
महाहनवे नमः । २८०

ॐ महाग्रीवायै नमः । लोहितायै । लोहिताशन्यै । कीर्त्यै । सरस्वत्यै ।
लक्ष्म्यै । श्रद्धायै । बुद्ध्यै । क्रियायै । स्थित्यै । चेतनायै ।
विष्णुमायायै । गुणातीतायै । निरञ्जनायै । निद्रायै । तन्द्रायै ।
स्मितायै । छायायै । जृम्भायै । क्षुदे नमः । ३००

ॐ अशनायितायै नमः । तृष्णायै । क्षुधायै । पिपासायै । लालसायै ।
क्षान्त्यै । विद्यायै । प्रजायै । स्मृत्यै । कान्त्यै । इच्छायै ।
मेधायै । प्रभायै । चित्यै । धरित्र्यै । धरण्यै । धन्यायै ।
धोरण्यै । धर्मसन्तत्यै । हालाप्रियायै नमः । ३२०

ॐ हरारात्यै नमः । हारिण्यै । हरिणेक्षणायै । चण्डयोगेश्वर्यै ।

सिद्धिकराल्यै । परिडामर्यै । जगदान्यायै । जनानन्दायै ।
नित्यानन्दमय्यै । स्थिरायै । हिरण्यगर्भायै । कुण्डलिन्यै । ज्ञानाय
धैर्याय खेचर्यै । नगात्मजायै । नागहारायै । जटाभारायै ।
प्रतर्दिन्यै । खङ्गिन्यै नमः । ३४०

ॐ शूलिन्यै नमः । चक्रवत्यै । बाणवत्यै । क्षित्यै । घृणये
धर्त्र्यै । नालिकायै । कर्त्र्यै । मत्यक्षमालिन्यै । पाशिन्यै ।
पशुहस्तायै । नागहस्तायै । धनुर्धरायै । महामुद्गरहस्तायै ।
शिवापोतधरायै । नारखर्परिण्यै । लम्बत्कचमुण्डप्रधारिण्यै ।
पद्मावत्यै । अन्नपूर्णायै । महालक्ष्म्यै नमः । ३६०

ॐ सरस्वत्यै नमः । दुर्गायै । विजयायै । घोरायै । महिषमर्द्दिन्यै ।
धनलक्ष्म्यै । जयप्रदायै । अश्वारूढायै । जयभैरव्यै ।
शूलिन्यै । राजमातङ्ग्यै । राजराजेश्वर्यै । त्रिपुटायै ।
उच्छिष्टचाण्डालिन्यै । अघोरायै । त्वरितायै । राज्यलक्ष्म्यै ।
जयायै । महाचण्डयोगेश्वर्यै । गुह्यायै नमः । ३८०

ॐ महाभैरव्यै नमः । विश्वलक्ष्म्यै । अरुन्धत्यै ।
यन्त्रप्रमथिन्यै । चण्डयोगेश्वर्यै । अलम्बुषायै । किरात्यै ।
महाचण्डभैरव्यै । कल्पवल्ल्यै । त्रैलोक्यविजयायै । सम्पत्प्रदायै ।
मन्थानभैरव्यै । महामन्त्रेश्वर्यै । वज्रप्रस्तारिण्यै ।
अङ्गचर्पटायै । जयलक्ष्म्यै । चण्डरूपायै । जलेश्वर्यै ।
कामदायिन्यै । स्वर्णकूटेश्वर्यै नमः । ४००

ॐ रुण्डायै नमः । मर्मर्यै । बुद्धिवर्द्धिन्यै । वार्त्താल्यै ।
चण्डवार्त्ताल्यै । जयवार्त्तालिकायै । उग्रचण्डायै । स्मशानोग्रायै ।
चण्डायै । रुद्रचण्डिकायै । अतिचण्डायै । चण्डवत्यै । प्रचण्डायै ।
चण्डनायिकायै । चैतन्यभैरव्यै । कृष्णायै । मण्डल्यै ।
तुम्बुरेश्वर्यै । वाग्वादिन्यै । मुण्डमधुमत्यै नमः । ४२०

ॐ अनर्घ्यायै नमः । पिशाचिन्यै । मञ्जीरायै । रोहिण्यै । कुल्यायै ।
तुङ्गायै । पूर्णेश्वर्यै var पर्णेश्वर्यै । वरायै । विशालायै ।
रक्तचामुण्डायै । अघोरायै । चण्डवारुण्यै । धनदायै । त्रिपुरायै ।
वागीश्वर्यै । जयमङ्गलायै । दैगम्बर्यै । कुञ्जिकायै । कुडुक्कायै ।
कालभैरव्यै नमः । ४४०

ॐ कुक्कुट्यै नमः । सङ्कटायै । वीरायै । कर्पटायै । भ्रमराम्बिकायै ।
महार्णवेश्वर्यै । भोगवत्यै । लङ्केश्वर्यै । पुलिन्द्यै । शबर्यै ।
म्लेच्छ्यै । पिङ्गलायै । शबरेश्वर्यै । मोहिन्यै । सिद्धिलक्ष्म्यै ।
बालायै । त्रिपुरसुन्दर्यै । उग्रतारायै । एकजटायै ।
महानीलसरस्वत्यै नमः । ४६०

ॐ त्रिकण्टक्यै नमः । छिन्नमस्तायै । महिषघ्न्यै । जयावहायै ।
हरसिद्धायै । अनङ्गमालायै । फेत्कार्यै । लवणेश्वर्यै ।
चण्डेश्वर्यै । नाकुल्यै । हयग्रीवेश्वर्यै । कालिन्द्यै । वज्रवाराह्यै ।
महानीलपताकिकायै । हंसेश्वर्यै । मोक्षलक्ष्म्यै । भूतिन्यै ।
जातरेतसायै । शातकर्णायै । महानीलायै नमः । ४८०

ॐ वामायै नमः । गुह्येश्वर्यै । भ्रम्यै । एकायै । अनंशायै ।
अभयायै । तार्क्ष्यै । बाभ्रव्यै । डामर्यै । कोरङ्ग्यै । चर्चिकायै ।
विन्नायै । संशिकायै । ब्रह्मवादिन्यै । त्रिकालवेदिन्यै । नीललोहितायै ।
रक्तदन्तिकायै । क्षेमङ्कर्यै । विश्वरूपायै । कामाख्यायै नमः । ५००

ॐ कुलकुट्टन्यै नमः । कामाङ्कुशायै । वेशिन्यै । मायूर्यै ।
कुलेश्वर्यै । इभाक्ष्यै । घोणक्यै । शार्ङ्ग्यै । भीमायै । देव्यै ।
वरप्रदायै । धूमावत्यै । महामार्यै । मङ्गलायै । हाटकेश्वर्यै ।
किरात्यै । शक्तिसौपर्ण्यै । बान्धव्यै । चण्डखेचर्यै ।
निस्तन्द्रायै नमः । ५२०

ॐ भवभूत्यै नमः । ज्वालाघण्टायै । अग्निमर्दिन्यै । सुरङ्गायै ।
कौलिन्यै । रम्यायै । नट्यै । नारायण्यै । धृत्यै । अनन्तायै ।
पुञ्जिकायै । जिह्वायै । धर्माधर्मप्रवर्तिकायै । वन्दिन्यै ।
वन्दनीयायै । वेलायै । अहस्करिण्यै । सुधायै । अरण्यै ।
माधव्यै नमः । ५४०

ॐ गोत्रायै नमः । पताकायै । वाङ्मय्यै । श्रुत्यै । गूढायै ।
त्रिगूढायै । विस्पष्टायै । मृगाङ्कायै । निरिन्द्रियायै । मेनायै ।
आनन्दकर्यै । बोध्र्यै । त्रिनेत्रायै । वेदवाहनायै । कलस्वनायै ।
तारिण्यै । सत्यप्रियायै । असत्यप्रियायै । अजडायै । एकवक्त्रायै नमः । ५६०

ॐ महावक्त्रायै नमः । बहुवक्त्रायै । घनाननायै । इन्दिरायै ।
काश्यप्यै । ज्योत्स्नायै । शवारूढायै । तनूदर्यै । महाशङ्खधरायै ।

नागोपवीतिन्यै । अक्षताशयायै । निरिन्धनायै । धराधारायै ।
व्याधिघ्न्यै । कल्पकारिण्यै । विश्वेश्वर्यै । विश्वधात्र्यै ।
विश्वेश्यै । विश्ववन्दितायै । विश्वायै नमः । ५८०

ॐ विश्वात्मिकायै नमः । विश्वव्यापिकायै । विश्वतारिण्यै ।
विश्वसंहारिण्यै । विश्वहस्तायै । विश्वोपकारिकायै । विश्वमात्रे
विश्वगतायै । विश्वातीतायै । विरोधितायै । त्रैलोक्यत्राणकर्त्र्यै ।
कूटाकारायै । कटकण्टायै । क्षामोदर्यै । क्षेत्रज्ञायै । क्षयहीनायै ।
क्षरवर्जितायै । क्षपायै । क्षोभकर्यै । क्षेभ्यायै नमः । ६००

ॐ अक्षोभ्यायै नमः । क्षेमदुघायै । क्षियायै । सुखदायै । सुमुख्यै ।
सौम्यायै । स्वङ्गायै । सुरपरायै । सुधियै सर्वान्तर्यामिन्यै ।
सर्वायै । सर्वाराध्यायै । समाहितायै । तपिन्यै । तापिन्यै । तीव्रायै ।
तपनीयायै । नाभिगायै । हैम्यै । हैमवत्यै नमः । ६२०

ॐ ऋद्ध्यै नमः । वृद्ध्यै । ज्ञानप्रदायै । नरायै ।
महाजटायै । महापादायै । महाहस्तायै । महाहनवे महाबलायै ।
महाशेषायै । महाधैर्यायै । महाघृणायै । महाक्षमायै ।
पुण्यपापध्वजिन्यै । घुर्घुरारवायै । डाकिन्यै । शाकिन्यै । रम्यायै ।
शक्त्यै । शक्तिस्वरूपिण्यै नमः । ६४०

ॐ तमिस्रायै नमः । गन्धरायै । शान्तायै । दान्तायै । क्षान्तायै ।
जितेन्द्रियायै । महोदयायै । ज्ञानिन्यै । इच्छायै । विरागायै ।
सुखिताकृत्यै । वासनायै । वासनाहीनायै । निवृत्त्यै । निर्वृत्यै ।
कृत्यै । अचलायै । हेतवे उन्मुक्तायै । जयिन्यै नमः । ६६०

ॐ संस्मृत्यै नमः । च्युतायै । कपर्दिन्यै । मुकुटिन्यै । मत्तायै ।
प्रकृत्यै । ऊर्जितायै । सदसत्साक्षिण्यै । स्फीतायै । मुदितायै ।
करुणामय्यै । पूर्वायै । उत्तरायै । पश्चिमायै । दक्षिणायै ।
विदिगुद्गतायै । आत्मारामायै । शिवारामायै । रमण्यै ।
शङ्करप्रियायै नमः । ६८०

ॐ वरेण्यायै नमः । वरदायै । वेण्यै । स्तम्भिण्यै । आकर्षिण्यै ।
उच्चाटन्यै । मारण्यै । द्वेषिण्यै । वशिन्यै । मह्यै । भ्रमण्यै ।
भारत्यै । भामायै । विशोकायै । शोकहारिण्यै । सिनीवाल्यै । कुह्वै
राकायै । अनुमत्यै । पद्मिन्यै नमः । ७००

ॐ ईतिहृते सावित्र्यै । वेदजनन्यै । गायत्र्यै । आहुत्यै । साधिकायै ।
चण्डाट्टहासायै । तरुण्यै । भूर्भुवःस्वःकलेवरायै । अतनवे
अतनुप्राणदात्र्यै । मातङ्गगामिन्यै । निगमायै । अब्धिमण्यै । पृथ्व्यै ।
जन्ममृत्युजरौषध्यै । प्रतारिण्यै । कलालापायै । वेद्यायै ।
छेद्यायै नमः । ७२०

ॐ वसुन्धरायै नमः । अप्रक्षुणायै । अवासितायै । कामधेनवे
वाञ्छितदायिन्यै । सौदामिन्यै । मेघमालायै । शर्वर्यै ।
सर्वगोचरायै । डमरवे डमरुकायै । निःस्वरायै । परिनादिन्यै ।
आहतात्मने हतायै । नादातीतायै । बिलेशयायै । परायै । अपरायै ।
पश्यन्त्यै नमः । ७४०

ॐ मध्यमायै नमः । वैखर्यै । प्रथमायै । जघन्यायै ।
मध्यस्थायै । अन्तविकासिन्यै । पृष्ठस्थायै । पुरःस्थायै ।
पार्श्वस्थायै । ऊर्ध्वतलस्थितायै । नेदिष्ठायै । दविष्ठायै ।
वर्हिष्ठायै । गुहाशयायै । अप्राप्यायै । वृंहितायै । पूर्णायै ।
पुण्यैर्निर्विदनायै var पुण्यैर्वेद्यायै । अनामयायै ।
सुदर्शनायै नमः । ७६०

ॐ त्रिशिखायै नमः । वृहत्यै । सन्तत्यै । विभायै । फेत्कारिण्यै ।
दीर्घस्रुक्कायै । भावनायै । भववल्लभायै । भागीरथ्यै । जाह्नव्यै ।
कावेर्यै । यमुनायै । स्मयायै । शिप्रायै । गोदावर्यै । वेण्यायै ।
विपाशायै । नर्मदायै । धुन्यै । त्रेतायै नमः । ७८०

ॐ स्वाहायै नमः । सामिधेन्यै । स्रुचे स्रुवायै । ध्रुवावसवे गर्वितायै ।
मानिन्यै । मेनायै । नन्दितायै । नन्दनन्दिन्यै । नारायण्यै ।
नारकघ्न्यै । रुचिरायै । रणशालिन्यै । आधारणायै । आधारतमायै ।
धर्माध्वन्यायै । धनप्रदायै । अभिज्ञायै । पण्डितायै नमः । ८००

ॐ मूकायै नमः । बालिशायै । वाग्वादिन्यै । ब्रह्मवल्ल्यै ।
मुक्तिवल्ल्यै । सिद्धिवल्ल्यै । विपह्न्व्यै । आह्लादिन्यै । जितामित्रायै ।
साक्षिण्यै । पुनराकृत्यै । किर्मर्यै । सर्वतोभद्रायै । स्वर्वेद्यै ।
मुक्तिपद्धत्यै । सुषमायै । चन्द्रिकायै । वन्यायै । कौमुद्यै ।
कुमुदाकरायै नमः । ८२०

ॐ त्रिसन्ध्यायै नमः । आम्नायसेतवे चर्चायै । ऋच्छायै ।

परिनैष्ठिक्यै । कलायै । काष्ठायै । तिथ्यै । तारायै । सङ्क्रान्त्यै ।
विषुवते मञ्जुनादायै । महावल्गवे भग्नभेरीस्वनायै । अरटायै ।
चित्रायै । सुप्त्यै । सुषुप्त्यै । तुरीयायै । तत्त्वधारणायै नमः । ८४०

ॐ मृत्युञ्जयायै नमः । मृत्युहर्यै । मृत्युमृत्युविधायिन्यै ।
हंस्यै । परमहंस्यै । बिन्दुनादान्तवासिन्यै । वैहायस्यै । त्रैदश्यै ।
भैम्यै । वासातन्यै । दीक्षायै । शिक्षायै । अनूढायै । कङ्काल्यै ।
तैजस्यै । सुर्यै । दैत्यायै । दानव्यै । नर्यै । नाथायै नमः । ८६०

ॐ सुर्यै नमः । इत्वर्यै । माध्व्यै । खनायै । खरायै । रेखायै ।
निष्कलायै । निर्ममायै । मृत्यै । महत्यै । विपुलायै । स्वल्पायै ।
क्रूरायै । क्रूराशयायै । उन्माथिन्यै । धृतिमत्यै । वामन्यै ।
कल्पचारिण्यै । वाडव्यै । वडवायै नमः । ८८०

ॐ अश्वोढायै नमः । कोलायै । पितृवनालयायै । प्रसारिण्यै ।
विशारायै । दर्पितायै । दर्पणप्रियायै । उत्तानायै । अधोमुख्यै ।
सुप्तायै । वञ्चन्यै । आकुञ्चन्यै । त्रुट्यै । क्रादिन्यै ।
यातनादात्र्यै । दुर्गायै । दुर्गतिनाशिन्यै । धराधरसुतायै । धीरायै ।
धराधरकृतालयायै नमः । ९००

ॐ सुचरित्र्यै नमः । तथात्र्यै । पूतनायै । प्रेतमालिन्यै । रम्भायै ।
उर्वश्यै । मेनकायै । कलिहृदे कलकृते कशायै । हरीष्टदेव्यै ।
हेरम्बमात्रे हर्यक्षवाहनायै । शिखण्डिन्यै । कोण्डपिन्यै । वेतुण्ड्यै ।
मन्त्रमय्यै । वज्रेश्वर्यै । लोहदण्डायै । दुर्विज्ञेयायै नमः । ९२०

ॐ दुरासदायै नमः । जालिन्यै । जालपायै । याज्यायै । भगिन्यै ।
भगवत्यै । भौजङ्ग्यै । तुर्वरायै । बभ्रुमहनीयायै । मानव्यै ।
श्रीमत्यै । श्रीकर्यै । गाध्यै । सदानन्दायै । गणेश्वर्यै ।
असन्दिग्धायै । शाश्वतायै । सिद्धायै । सिद्धेश्वरीडितायै ।
ज्येष्ठायै नमः । ९४०

ॐ श्रेष्ठायै नमः । वरिष्ठायै । कौशाम्ब्यै । भक्तवत्सलायै ।
इन्द्रनीलनिभायै । नेत्र्यै । नायिकायै । त्रिलोचनायै । वार्हस्पत्यायै ।
भार्गव्यै । आत्रेय्यै । आङ्गिरस्यै । धुर्याधिहर्त्र्यै । धरित्र्यै ।
विकटायै । जन्ममोचिन्यै । आपदुत्तारिण्यै । दृप्तायै । प्रमितायै ।
मितिवर्जितायै नमः । ९६०

ॐ चित्ररेखायै नमः । चिदाकारायै । चञ्चलाक्ष्यै । चलत्पदायै ।
बलाहक्यै । पिङ्गसटायै । मूलभूतायै । वनेचर्यै । खग्यै ।
करन्धमायै । ध्माक्ष्यै । संहितायै । केररीन्धनायै var
ध्माक्ष्यै । अपुनर्भविन्यै । वान्तरिण्यै । यमगञ्जिन्यै । वर्णातीतायै ।
आश्रमातीतायै । मृडान्यै । मृडवल्लभायै नमः । ९८०

ॐ दयाकर्यै नमः । दमपरायै । दम्भहीनायै । आहृतिप्रियायै ।
निर्वाणदायै । निर्बन्धायै । भावायै । भावविधायिन्यै । नैःश्रेयस्यै ।
निर्विकल्पायै । निर्बीजायै । सर्वबीजिकायै । अनाद्यन्तायै । भेदहीनायै ।
बन्धोन्मूलिन्यै । अबाधितायै । निराभासायै । मनोगम्यायै । सायुज्यायै ।
अमृतदायिन्यै नमः । १०००

॥ इति महाकालसंहितायां कामकलाखण्डे द्वादशपटले
श्रीकामकलाकालीसहस्रनामावलिः समाप्ता ॥

Proofread by PSA Easwaran psawaswaran

*Shri Kamakalakali Sahasranamavali 1000 Names*

pdf was typeset on October 26, 2023

Please send corrections to *sanskrit@cheerful.com*